योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः १०८

अष्टोत्तरशततमः सर्गः १०८

राजोवाच ।

अथ गच्छति कालेऽत्र जराजर्जरितायुषि ।

तुषारपूर्णशष्पौघसमश्मश्रुभृते मयि ।। १

कर्मवातापनुन्नेषु सरसेष्वरसेष्वपि ।

पतत्सु वासरौघेषु शीर्णपर्णगणेष्विव ।। २

आजाविव शरौघेषु सुखदुःखेष्वनारतम् ।

कलहेष्वप्यकार्येषु चागच्छत्सु पतत्सु च ।। ३

विकल्पकल्पनावर्तवर्तिनि द्विजगे जडे ।

समुद्र इव कल्लोलभरे भ्रमितचेतसि ।। ४

चलच्चिन्ताचितं चक्रमारूढे भ्रान्त आत्मनि ।

प्रोह्यमाने तृण इव सावर्तं कालसागरे ।। ५

विन्ध्योर्वीवनकीटस्य ग्रासैकशरणस्य मे ।

द्विबाहोर्गर्दभस्यात्र क्षीण इत्थं समागणे ।। ६

विस्मृते मम भूपत्वे शवस्येव महाजवे ।

चाण्डालत्वे स्थिरीभूते पक्षच्छिन्न इवाचले ।। ७

संसारमिव कल्पान्तो दावाग्निरिव काननम् ।

सागरोर्मिस्तटमिव शुष्कवृक्षमिवाशनिः ।। ८

अकाण्डे मरणोड्डीनं चण्डचण्डालमण्डलम् ।

निरन्नतृणपत्राम्बु विन्ध्यकच्छं तदाययौ ।। ९

न वर्षति घनव्राते दृष्टनष्टे क्वचित्स्थिते ।

पूतांगारकणोन्मिश्रगतौ वहति मारुते ।। १०

शीर्णमर्मरपर्णासु दावाग्निवलितासु च ।

वनस्थलीषु शून्यासु चिरप्रव्रजितास्विव ।। ११

अकाण्डमभवद्भीममुद्दामदवपावकम् ।

शोषिताशेषगहनं भस्मशेषतृणोलपम् ।। १२

पांसुधूसरसर्वाङ्गं क्षुधिताशेषमानवम् ।

निरन्नतृणपानीयं देशाद्युद्दावमण्डलम् ।। १३

कचन्मरुमरीच्यम्बुमज्जन्महिषमण्डलम् ।

वातोत्थसीकरव्यूहापरिवाहवनाम्बरम् ।। १४

पानीयशब्दमात्रैकश्रवणोत्कनरव्रजम् ।

आतपाततिसंशोषसीदत्सकलमानवम् ।। १५

पत्रग्रसनसंरब्धक्षुधितोत्थितजीवितम् ।

स्वाङ्गचर्वणसंरम्भलुठद्दशनमण्डलम् ।। १६

मांसशङ्कानिगीर्णोग्रखदिराग्निकणोत्करम् ।

मण्डकासारसंग्रस्तवनपाषाणखण्डकम् ।। १७

अन्योन्यभूतसंसक्तमातृपुत्रपितृव्रजम् ।

गृध्रोदररटत्सारनिगीर्णवरसारिकम् ।। १८

परस्पराङ्गविच्छेदरक्तसिक्तधरातलम् ।

हरिग्रसनसंरब्धमत्तक्षुधितवारणम् ।। १९

दरीनिगरणैकैकसिंहभ्रमणभीषणम् ।

अन्योन्यग्रसनोद्युक्तलोकमल्लकृतं वहत् ।। २०

निष्पत्रपादपोड्डीनप्रौढाङ्गारमयानिलम् ।

रक्तपानोत्कमार्जारलीढधातुतटावनि ।। २१

ज्वालाघनघटाटोपसावर्तसवनानिलम् ।

सर्वस्थलरसद्वह्निपुञ्जपिञ्जरजङ्गलम् ।। २२

दग्धाजगरकुञ्जोत्थधूममांसलगुल्मकम् ।

मारुतावलितज्वालासंध्याभ्रवलिताम्बरम् ।। २३

उद्दामरवमुद्भ्रान्तभस्मनाऽस्तम्भमण्डलम् ।

साक्रन्दनरदाराग्रदीनार्भककृतारवम् ।। २४

संभ्रान्तपुरुषव्यूहदन्तकृत्तमहाशवम् ।

मांसगन्धजवग्रस्तरक्तारक्तनिजाङ्गुलि ।। २५

नीलपत्रलताशङ्कापीतधूमघनच्छवि ।

भ्रमद्गृध्रनिगीर्णोग्रनभोभ्रान्तोल्मुकामिषम् ।। २६

इतरेतरभिन्नाङ्गलोकविद्रवणाकुलम् ।

ज्वलिताग्निटणत्कारविदीर्णहृदयोदरम् ।। २७

गर्तमारुतक्राङ्कारभीमदावाग्निवल्गनम् ।

भीताजगरफूत्कारपतदङ्गारपादपम् ।। २८

सदकाण्डस्फुटद्देशं प्राप्य तच्छुष्ककोटरम् ।

द्वादशार्काग्निदग्धस्य जगतोऽनुकृतिं ययौ ।। २९

ज्वलदनलजटालवृक्षखण्ड-

प्रसरमरुत्प्रसरावनुन्नलोकः ।

ज्वलनतपनभास्करात्मजानां

रमणगृहानुकृतिं जगाम देशः ।। ३० ।।

इत्यार्षे श्रीवासिष्ठमहारामायणे मोक्षोपाये उत्पत्तिप्रकरणे इन्द्रजालोपाख्याने अकाण्डवर्णनं नामाष्टोत्तरशततमः सर्गः ।। १०८ ।।